# shrI lalitA tripurasundarI aparAdha kShamApana stotram

# શ્રીલલિતા ત્રિપુરસુન્દરી અપરાધક્ષમાપણસ્તોત્રમ્

## Document Information

Text title : tripurasundarI aparAdha kShamApaNa stotram

File name : tripurasundarIaparAdhakShamApana.itx

Category : aparAdhakShamA, devii, dashamahAvidyA, lalitA, devI, panchadashI

Location : doc_devii

Transliterated by : V. Gopalakrishnan vgk at igcar.ernet.in

Proofread by : V. Gopalakrishnan and his father who is a Sanskrit scholar.

Description-comments : A Hymn of worship to Goddess Tripurasundari

Latest update : December 27, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 26, 2025

*sanskritdocuments.org*

shrI lalitA tripurasundarI aparAdha kShamApana stotram

# શ્રીલલિતા ત્રિપુરસુન્દરી અપરાધક્ષમાપણસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।

ૐ કઞ્જમનોહર પાદચલન્મણિ નૂપુરહંસ વિરાજિતે
કઞ્જભવાદિ સુરૌઘપરિષ્ટુત લોકવિસૃત્વર વૈભવે ।
મઞ્જુળવાઙ્મય નિર્જિતકીર કુલેચલરાજ સુકન્યકે
પાલય હે લલિતાપરમેશ્વરિ મામપરાધિનમમ્બિકે ॥ ૧॥

એણધરોજ્વલ ફાલતલોલ્લસ દૈણમદાઙ્ક સમન્વિતે
શોણપરાગ વિચિત્રિત કન્દુક સુન્દરસુસ્તન શોભિતે ।
નીલપયોધર કાલસુકુન્તલ નિર્જિતભૃઙ્ગ કદમ્બકે
પાલય હે લલિતાપરમેશ્વરિ મામપરાધિનમમ્બિકે ॥ ૨॥

ઈતિવિનાશિનિ ભીતિ નિવારિણિ દાનવહન્ત્રિ દયાપરે
શીતકરાઙ્કિત રત્નવિભૂષિત હેમકિરીટ સમન્વિતે ।
દીપ્તતરાયુધ ભણ્ડમહાસુર ગર્વ નિહન્ત્રિ પુરામ્બિકે
પાલય હે લલિતાપરમેશ્વરિ મામપરાધિનમમ્બિકે ॥ ૩॥

લબ્ધવરેણ જગત્રયમોહન દક્ષલતાન્ત મહેષુણા
લબ્ધમનોહર સાલવિષણ્ણ સુદેહભુવાપરિ પૂજિતે ।
લઙ્ઘિતશાસન દાનવ નાશન દક્ષમહાયુધ રાજિતે
પાલય હે લલિતાપરમેશ્વરિ મામપરાધિનમમ્બિકે ॥ ૪॥

હ્રીમ્પદ ભૂષિત પઞ્ચદશાક્ષર ષોડશવર્ણ સુદેવતે
હ્રીમતિહાદિ મહામનુમન્દિર રત્નવિનિર્મિત દીપિકે ।
હસ્તિવરાનન દર્શિતયુદ્ધ સમાદર સાહસતોષિતે
પાલય હે લલિતાપરમેશ્વરિ મામપરાધિનમમ્બિકે ॥ ૫॥

હસ્તલસન્નવ પુષ્પસરેક્ષુ શરાસન પાશમહાઙ્કુશે
હર્યજશમ્ભુ મહેશ્વર પાદ ચતુષ્ટય મઞ્ચ નિવાસિનિ ।

હંસપદાર્થ મહેશ્વરિ યોગિ સમૂહસમાદૃત વૈભવે
    પાલય હે લલિતાપરમેશ્વરિ મામપરાધિનમમ્બિકે ॥ ૬॥

સર્વજગત્કરણાવન નાશન કર્ત્રિ કપાલિ મનોહરે
    સ્વચ્છમૃણાલ મરાલતુષાર સમાનસુહાર વિભૂષિતે ।
સજ્જનચિત્ત વિહારિણિ શઙ્કરિ દુર્જન નાશન તત્પરે
    પાલય હે લલિતાપરમેશ્વરિ મામપરાધિનમમ્બિકે ॥ ૭॥

કઞ્જદળાક્ષિ નિરઞ્જનિ કુઞ્જર ગામિનિ મઞ્જુળ ભાષિતે
    કુઙ્કુમપઙ્ક વિલેપન શોભિત દેહલતે ત્રિપુરેશ્વરિ ।
દિવ્યમતઙ્ગ સુતાધૃતરાજ્ય ભરે કરુણારસ વારિધે
    પાલય હે લલિતાપરમેશ્વરિ મામપરાધિનમમ્બિકે ॥ ૮॥

હલ્લકચમ્પક પઙ્કજકેતક પુષ્પસુગન્ધિત કુન્તલે
    હાટક ભૂધર શ◌ૃઙ્ગવિનિર્મિત સુન્દર મન્દિરવાસિનિ ।
હસ્તિમુખામ્બ વરાહમુખીધૃત સૈન્યભરે ગિરિકન્યકે
    પાલય હે લલિતાપરમેશ્વરિ મામપરાધિનમમ્બિકે ॥ ૯॥

લક્ષ્મણસોદર સાદર પૂજિત પાદયુગે વરદેશિવે
    લોહમયાદિ બહૂન્નત સાલ નિષણ્ણ બુધેશ્વર સમ્યુતે ।
લોલમદાલસ લોચન નિર્જિત નીલસરોજ સુમાલિકે
    પાલય હે લલિતાપરમેશ્વરિ મામપરાધિનમમ્બિકે ॥ ૧૦॥

હ્રીમિતિમન્ત્ર મહાજપ સુસ્થિર સાધકમાનસ હંસિકે
    હ્રીમ્પદ શીતકરાનન શોભિત હેમલતે વસુભાસ્વરે ।
હાર્દતમોગુણ નાશિનિ પાશ વિમોચનિ મોક્ષસુખપ્રદે
    પાલય હે લલિતાપરમેશ્વરિ મામપરાધિનમમ્બિકે ॥ ૧૧॥

સચ્ચિદભેદ સુખામૃતવર્ષિણિ તત્ત્વમસીતિ સદાદૃતે
    સદ્ગુણશાલિનિ સાધુસમર્ચિત પાદયુગે પરશામ્બવિ ।
સર્વજગત્ પરિપાલન દીક્ષિત બાહુલતાયુગ શોભિતે
    પાલય હે લલિતાપરમેશ્વરિ મામપરાધિનમમ્બિકે ॥ ૧૨॥

કમ્બુગળે વર કુન્દરદે રસ રઞ્જિતપાદ સરોરુહે
    કામમહેશ્વર કામિનિ કોમલ કોકિલ ભાષિણિ ભૈરવિ ।
ચિન્તિતસર્વ મનોહર પૂરણ કલ્પલતે કરુણાર્ણવે
    પાલય હે લલિતાપરમેશ્વરિ મામપરાધિનમમ્બિકે ॥ ૧૩॥

લસ્તકશોભિ કરોજ્વલ કઙ્કણકાન્તિ સુદીપિત દિઙ્મુખે
    શસ્તતર ત્રિદશાલય કાર્ય સમાદૃત દિવ્યતનુજ્વલે ।
કશ્ચતુરોભુવિ દેવિપુરેશિ ભવાનિ તવસ્તવને ભવેત્
    પાલય હે લલિતાપરમેશ્વરિ મામપરાધિનમમ્બિકે ॥ ૧૪॥

હ્રીમ્પદલાઞ્ચિત મન્ત્રપયોદધિ મન્થનજાત પરામૃતે
    હવ્યવહાનિલ ભૂયજમાનક ખેન્દુ દિવાકરરૂપિણિ ।
હર્યજરુદ્ર મહેશ્વર સંસ્તુત વૈભવશાલિનિ સિદ્ધિદે
    પાલય હે લલિતાપરમેશ્વરિ મામપરાધિનમમ્બિકે ॥ ૧૫॥

શ્રીપુરવાસિનિ હસ્તલસદ્વર ચામરવાક્કમલાનુતે
    શ્રીગુહપૂર્વ ભવાર્જિત પુણ્યફલે ભવમત્તવિલાસિનિ ।
શ્રીવશિની વિમલાદિ સદાનત પાદચલન્મણિ નૂપુરે
    પાલય હે લલિતાપરમેશ્વરિ મામપરાધિનમમ્બિકે ॥ ૧૬॥

॥ ઇતિ શ્રીલલિતાત્રિપુરસુન્દરી અપરાધક્ષમાપણસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by V. Gopalakrishnan vgk at igcar.ernet.in

*shrI lalitA tripurasundarI aparAdha kShamApana stotram*

pdf was typeset on February 26, 2025

Please send corrections to *sanskrit@cheerful.com*